# श्री कृष्णमाला

1) वृन्दारकैर्वन्दित आविरासीद् भोजेन्द्रपुत्र्यां भगवान् मुकुन्दः ।
स वासुदेवो वसुदेवनीतो व्रजं तदाऽनीयत तेन दुर्गा ॥

2) कंसे-यशोदा सुतया विषण्णे भूम्ना हतायामपि पूतनायाम् ।
दत्वा करं नन्दति तत्र नन्दे चिक्षेप देवः शकटाक्ष-दैत्यम् ॥

3) स रौहिणेयेन निजाग्रजेन शेषेण पूर्वं शिशुवद् विरेजे ।
मात्रे स्ववक्रे प्रकटीचकार् विश्वं तृणावर्तमपि न्यगृह्णात् ॥

4) गर्गस्तुतो मृद्भुगशेषदर्शी मात्रा निबद्धोऽर्जुन-भञ्जनोऽलम् ।
वृकैस्तु वृन्दावनगः सरामः स वत्सपालो भुवनोत्सवोऽभूत् ॥

5) वत्सासुरारिर्बक-भित्सु-गोपो गोगोपलक्ष्मी-कटुकालिया-ध्रुक् ।
पीत्वा दवं चोग्रसुरार्यगारिः सप्तोक्ष-दैत्यच्छिदवाप जायाम् ॥

6) हत्वा खरं दैत्यमथ प्रलंबं बलेन पीत्वा च पुनर्दवाग्निम् ।
विप्राभिराप्तो गिरि-गुप्त-गोपो गोविन्द इन्द्रार्चित ऐक्षि गोपैः ॥

7) कात्यायनी भक्तिमतीश्च कन्या: उवाह रेमेऽखिलगोपिकाभि: ।

अदाच्च ताभ्यो दशलक्ष-पुत्रान् स शङ्खचूडारिररिष्टमास्यत् ॥

8) नन्दाविताऽहेर्वरुणस्य दूताद् वैकुण्ठदर्शी पशु-जीवनेभ्य:।

केश्यर्वहा व्योम-सुरारि-हारी कंसाघमक्रूरगिराऽश्रृणोत् स: ॥

9) साक्रूर-रामो मधुरां स गच्छन् अक्रूरदृष्टो यमुना-जले च ।

अवैक्षि पौरैर्ध्रृत-धौत वासा: अलक्तकाक्तोऽमल-माल-भारी ॥

10) सत्सुन्दरश्चन्दन-चर्चिताङ्ग: चापं च चित्तं च चकर्ष कांसम् ।

सहस्तिनं हस्तिपतिं च हत्वा चाणूरहा मुष्टिकवैरिणाऽभात् ॥

11) बलोऽथ कंसावरजान् जघान बलानुज: कंसबलं च कंसम् ।

प्रसाद्य मातापितरौ नृपं च चक्रे विशोकस्य पिता सराम: ॥

12) द्विजत्वमाप्तोऽथ विमुच्य नन्दं सुतम् मृतं प्राग् गुरवे ददौ स:।

जरासुतं द्वाररुधं सरामो जिगाय चाष्टादशयुत्सु चेश: ॥

13) पार्थानथाक्रूरमयापयत्स: भीमाद्यवाप्तो व्रजमुद्धवं च ।
गोमन्त-गो राममयुत:किरीटी जरासुतं प्रास्य सृगालहाऽभूत् ॥

14) दुर्मन्त्रभूपैर्भयतोऽभिषिक्त: कृष्णो विदर्भेऽकृत विश्वरूपम् ।
कृत्वा पुरीं यावनमीरतं तै: स घातयित्वाऽशु नृपानजैषीत् ॥

15) स रेवती-कान्त-युतो जितारि: भैष्मीमवाप्याकृत शम्बरारिम् ।
स्यमन्तकं जाम्बवतीं च लब्ध्वा सत्यां च लेभेऽजनयच्च साम्बम् ॥

16) विचक्रहा भूतनुदस्तरक्षा: बलेन साल्वार्दनसात्यकेन ।
युत: स हंसं डिभकं च हत्वा गदाग्रजोऽभाद् दयितत्रिशुक्ल: ॥

17) पार्थश्रिये हार्दिकमुक् कुरूंश्च गत्वाऽप्तभार्यान् द्विरवाप पार्थान् ।
अथाभिषिच्येन्द्रपुरे निधाय पार्थान् स सत्याजनकघ्नमास्यत् ॥

18) प्रदर्श्य रत्नं हलिनेऽर्कपुत्रीमवाप निलामपि स द्विरूपाम् ।
स मित्रविन्दामथ कैकयीं च भद्रां तु माद्रीमपि लक्षणाख्याम् ॥

19) तं नारदोऽथाखिलराजमध्ये प्रोचे त्वमाश्चर्यतमोऽसि धन्यः ।

कुन्त्याऽर्थितः पार्थकुरूनजैषीत् इत्थं मुरादीन् नरकं च सोऽहन् ॥

20) सत्यार्थमीशो हृतपारिजातो देवौघजिद् व्यष्टसहस्रभार्यः ।

प्रत्येकमेतासु दशाप पुत्रान् सुतौ विजिष्णू अपि सोऽभ्यनन्दत् ॥

21) स नारदावेक्षित विश्वरूपः पुरे सुभद्रां विजयाय चादात् ।

ददौ स रामो बहुरत्नमस्मै ददाह पार्थेन च खाण्डवं सः ॥

22) समन्तपूर्वं खलु पञ्चकं च गतो व्यधत्ताह्निकमश्वमेधम् ।

पुरं व्रजन् मार्ग –रुधं निरास स दन्तवक्रं च विडूरथं च॥

23) संशिक्ष्य जिष्णुं स जरासुतारिं भीमं समाश्लिश्य जघान चैद्यम् ।

निहत्य सौभेशमवेक्ष्य पार्थान् वने शिवार्ची खलमोहनाय ॥

24) स पौन्ड्रकं निर्जितवान् जघान तथैकलव्यं च सुदक्षिणं च ।

भैष्म्यां व्यधात् प्रेमकलेर्विडम्बं रामम् व्रजं यान्तमथात्मवाक्यात् ॥

25) मैन्दं च हत्वा विविदघ्नमद्रौ कृष्णोऽभ्यनन्दत् कुरुभीषणं च ।

अग्न्यादिजिद् बाणजयी प्रभासे स प्राप पार्थान् कुरुराष्ट्रगांश्च ॥

26) विवाह्य सौभद्रमुदारमन्त्रो वृतः स्वपुर्यां विजयेन सौत्ये ।

सुमन्त्रकृत् पाण्डवसौत्यकारी स विश्वरूपोऽर्जुनशिक्षकोभात् ॥

27) स्वानन्दनं मन्दमनोज्ञहासं शृङ्गारिणं शार्ङ्गिणमीक्षणाभ्याम् ।

मुष्णन्तमायूंशि तमीक्षमाणा यौधा गतिं योगजितामवापुः ॥

28) भीष्मप्रतिज्ञानमपीपलत्स भीष्मोक्तभूमा हृतवैष्णवास्त्रः ।

स्वप्नेऽर्जुनानुग्रहकृत्सुभद्राशोकच्छिदीशः स्वनयन् स्वशङ्खम् ॥

29) शैनेयपो वासविना जघान जयद्रथं नीतिनिवारितास्त्रः ।

द्रौणीषु बद्धार्जुनवीर्यकारी राजेन्द्रसून्वोः स विरोधमास्यत् ॥

30) अपात् स पार्थं रथमानमय्य भीमं च तुष्टाव निनिन्द दुष्टम् ।

द्रौणिं स शस्त्वाऽम्बिकदोषदर्शी कृष्णां प्रसाद्याभिषिषेच धार्मम् ॥

31) स्वयम् च भीष्मेण च शिक्षयित्वा भूपं स भीमेन कलिं निबध्य ।
जिष्णोर्गुरुः कारुणिकोऽप्युदङ्के गत्वा पुरीं स्वेभ्य उवाच वृत्तम् ॥

32) व्रजन्नुदङ्केष्टकृदेष पार्थान् परीक्षिते जीवनदोऽङ्गवादी ।
अयाजयद् धर्मजमश्वमेधैरूचे च धर्मानयजत्स्वयं च ॥

33) सुरार्चितः शिक्षक उद्धवस्य स्वं ब्रह्मशापच्छलतः कुलं च ।
संहृत्य कृष्णो निजचित्तपद्मे देदीप्यते देव उत स्वलोके ॥

34) उद्धृत्य शास्त्राम्बुनिधेर्निबद्धामभीष्टदात्रीमिव रत्नमालाम् ।
नारायणस्यार्पयते पदाब्जे नारायणःश्रीमति कृष्णमालाम् ॥

॥ इति श्रीनारायणपण्डिताचार्यविरचिता कृष्णमाला ॥